# Rishikashyapaproktam Shankaralakshanam

# ઋષિકશ્યપપ્રોક્તં શાઙ્કરલક્ષણમ્

## Document Information

Text title : Rishikashyapaproktam Shankaralakshanam

File name : RRiShikashyapaproktaMshAnkaralakShaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 16 | 1-9||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં શાઙ્કરલક્ષણમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
કાશ્યપ ઉવાચ ।
સ્તુવન્તિ મહાદેવં તે વૈ હારાઃ પ્રકીર્તિતાઃ ।
યેઽર્ચયન્તિ મહાદેવં તે વૈ શામ્ભવસત્તમાઃ ॥ ૧॥

યે ધ્યાયન્તિ મહેશાનચરણામ્બુજમુત્તમમ્ ।
યે વૈ ક્ષેત્રેષુ નિરતા વિરતાશ્ચાન્યવસ્તુષુ ॥ ૨॥

આનન્દવનવાસેન સર્વદાનન્દમેદુરાઃ ।
શિવલિઙ્ગાર્ચકા એવ તે વૈ સાઙ્ગાઃ પ્રકીર્તિતાઃ ॥ ૩॥

યે વૈ નૈવેદ્યભોક્તારસ્તે વૈ ભાવાઃ પ્રકીર્તિતાઃ ।
યે નામનિરતાઃ શમ્ભોરન્યનામપરાઙ્મુખાઃ ॥ ૪॥

તે વૈ માહેશ્વરાઃ પ્રોક્તાઃ પાત્રભૂતાઘહારિણઃ ।
શિવભક્તાર્ચકા યે વૈ ધનધાન્યાદિભિર્મુદા ॥ ૫॥

શાઙ્કરાસ્તે સદાજ્ઞેયા દૃષ્ટાસ્સ્પૃષ્ટાઃ પ્રકાદિનઃ ।
યે ભસ્મોદ્ધૂલોદ્યુક્તાસ્તે વૈ શૈવાઃ પ્રકીર્તિતાઃ ॥ ૬॥

અગ્નિરિત્યાદિભિર્મન્ત્રૈઃ સર્વદા યેઽનિશં મુદા ।
દગ્ધપાપાસ્ત એવેતિ વિજ્ઞેયાઃ શામ્ભવોત્તમાઃ ॥ ૭॥

ત્ર્યાયુષં ત્રિપુણ્ડ્રૈશ્ચ તથા ચ ત્ર્યમ્બકૈરપિ ।
ત્રિપુણ્ડ્રધારિણઃ સર્વે તે રુદ્રા (રૌદ્રા) નાત્ર સંશયઃ ॥ ૮॥

અઘોરમન્ત્રતો યે વૈ સદા રુદ્રાક્ષધારિણઃ ।
કણ્ઠકર્ણગલાદ્યઙ્ગબાહુમસ્તકકેષ્વપિ ॥ ૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં શાઙ્કરલક્ષણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૬ । ૧-૯॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 16 . 1-9..

Notes:

Ṛṣi Kaśyapa ઋષિ કશ્યપ speaks about indicators and significations of Śāṅkarāḥ શાઙ્કરાઃ a.k.a Hāraḥ હારાઃ, Śāmbhavāḥ શામ્ભવાઃ, Sāṅgāḥ સાઙ્ગાઃ, Māheśvarāḥ માહેશ્વરાઃ, Śaivāḥ શૈવાઃ, Raudrāḥ રૌદ્રાઃ - the various forms of worshippers of Śiva શિવ.

Proofread by Ruma Dewan

---

*Rishikashyapaproktam Shankaralakshanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*